**911**

# SAMAGRA SHIKSHA, KERALA

## Annual Evaluation - 2021-22

First Language - Paper I - Part I

## SANSKRIT

(For Academic and Oriental Sanskrit Schools)

**Class- IX**

Time -1½ Hours | Total Score - 40

**निर्देशाः -**

- १५ निमेषाः समाश्वासकालः । प्रश्नान् पठितुम् उत्तराणि क्रमीकर्तुं च अयं कालः उपयोक्तव्यः।
- प्रश्नान् निर्देशान् च सम्यग् अवगम्य एव उत्तराणि लेखनीयानि ।
- उत्तरलेखने मूल्याङ्काः कालः च परिगणनीयाः।
- विवर्तनप्रश्नाद् ऋते सर्वेषां प्रश्नानाम् उत्तरलेखने देवनागरीलिपिरुपयोक्तव्या ।

**1. अधोदत्तेभ्यः चतुर्णां प्रश्नानाम् उत्तराणि कोष्ठकात् निर्धार्य लिखत।** **4x1=4**

अ) केषां भाषितं पुनरुक्तं न भवति ?

(सज्जनानाम्, समर्थानाम्, अलसानाम् , दुष्टानाम्, )

आ) वेदाङ्गेषु अन्यतमं भवति ।

(ऋक् , साम, अथर्वः, कल्पः)

इ) ' केदारः ' इत्यर्थकं पदं लिखत ।

(देविश्री , साव, क्लियाङ्, सुबाक्)

ई) 'मत्स्याः मम जीवनहेतवः ' - कस्य वचनमिदम् ?

(बकस्य , कुलीरस्य, ग्रामीणस्य, कैवर्तकस्य)

उ) कस्य दोषनिवारणाय औषधं नास्ति ?

(धनिकस्य , मूर्खस्य , सज्जनस्य, दरिद्रस्य)

ऊ) कथासरित्सागरस्य कर्ता कः ?

(सोमदेवभट्टः, नारायणपण्डितः, विष्णुशर्मा, गुणाढ्यः )

**2. यथोचितं योजयत।** **4x1=4**

| | | | |
|---|---|---|---|
| अ) | जानकी | - | माकन्दमञ्जरी। |
| आ) | हनुमान् | - | बालिद्वीप्। |
| इ) | माम्पषम् | - | सीता । |
| ई) | अरिश्री | - | सुन्दरकाण्डः । |

3. उदाहरणानुसारं लिखत। 1x1=1

उदा - सन्तुष्टोऽभवत् - सन्तुष्टः + अभवत् ।

अ) पुत्रोऽक्षिपत् - ............ + .........।

4. उदाहरणानुसारं लिखत। 1x1=1

उदा- आश्चर्येण भरितः - आश्चर्यभरितः ।

अ) सन्तोषेण भरितः - ............... ।

5-9 अधोदत्तेभ्यः प्रश्नेभ्यः त्रयाणाम् उत्तराणि लिखत । 3x2=6

5. उदाहरणानुसारं वाक्यं परिवर्तयत ।

उदा - अश्वः शीघ्रं धावति। अश्वः शीघ्रं अधावत्।

अ) बालः शीघ्रं लिखति। .......................... ।

6. उदाहरणानुसारं वाक्यं परिवर्तयत ।

उदा - सन्तापेन किमपि प्रयोजनं नास्ति। अलं सन्तापेन।

अ) कोपेन किमपि प्रयोजनं नास्ति। .................. ।

7. 'सज्जनाः अन्यैः कृतम् उपकारं कदापि न विस्मरन्ति।'- इति आशययुक्तं सुभाषितं चित्वा लिखत।

अ) तृणानि नोन्मूलयति प्रभञ्जनो
मृदूनि नीचैः प्रणतानि सर्वतः ।
समुच्छ्रितानेव तरून् प्रबाधते
महान् महत्येव करोति विक्रमम् ॥

आ) प्रथमवयसि दत्तं तोयमल्पं स्मरन्तः
शिरसि निहितभाराः नारिकेला नराणाम् ।
सलिलममृतकल्पं दद्युराजीवनान्तं
न हि कृतमुपकारं साधवो विस्मरन्ति ॥

8. उदाहरणानुसारं वाक्यं परिवर्तयत ।

उदा - आतपः समागतः । छत्रम् उद्घाटयति ।
यदा आतपः समागतः तदा छत्रम् उद्घाटयति ।

अ) परीक्षा समागता । छात्राः अत्युत्साहेन पठन्ति।

9. अधोदत्तं श्लोकं पठित्वा गद्यक्रमं पूरयत।

किं वा वक्ष्यति वृद्धश्च
जाम्बवानङ्गदश्च सः।
गतं पारं समुद्रस्य
वानराश्च समागताः॥

गद्यक्रमः - समुद्रस्य ........... समागताः ........... सः अङ्गदः च वृद्धः ...........
किं वा ....... ?

10-11 अधोदत्तेभ्यः प्रश्नेभ्यः एकस्य उत्तरं लिखत। 3x1=3

10. कोष्ठकात् समुचितं पदं स्वीकृत्य पट्टिकां पूरयत।

| | विग्रहः | एकपदम् |
|---|---|---|
| अ) | हिमम् अस्ति अस्मिन् | |
| आ) | आचारं ग्राहयति | |
| इ) | तुरेण गच्छति | |

(आचार्यः, तुरगः, हिमवान्, ऐश्वर्यम्।)

11. अधोदत्तं वाक्यं पठित्वा क्त्वान्त-ल्यबन्त-तुमुन्नन्तानि अव्ययानि चित्वा लिखत।

छात्राः सूचनाः पठित्वा कथां विलिख्य कक्ष्यायाम् अवतारयितुम् आरभन्त।

12-14 अधोदत्तेभ्यः प्रश्नेभ्यः द्वयोः उत्तरं लिखत। 2x4=8

12. गद्यांशं पठित्वा प्रश्नानाम् उत्तराणि लिखत।

भारते बहवः ऋषितुल्याः समाजपरिष्कर्तारः भवन्ति। तेषु अन्यतमः भवति राजाराममोहन् राय् महाभागः। सामूहिकमण्डले, शिक्षामण्डले, राष्ट्रियकार्ये च तेन महात्मना अनुष्ठितानि सेवनानि महत्तराण्येव। शिक्षया अज्ञानं दूरीकर्तुम् आत्मीयसम्पदा सह भौतिकसम्पदः विज्ञानप्रभां च प्रवर्धयितुं प्रसारयितुं च सः ब्रह्मसभां स्थापयामास। कालान्तरे इयं सभा ब्रह्मसमाजः इति नाम्ना प्रथिता बभूव।

अ) भारते समाजपरिष्कर्तारः कीदृशाः भवन्ति?

आ) राजाराममोहन् राय् किमर्थं ब्रह्मसभां स्थापयामास?

इ) ब्रह्मसभा कालान्तरे केन नाम्ना प्रसिद्धा?

ई) खण्डिकायाः उचितं शीर्षकं लिखत।

13. समानार्थकपदानि चित्वा पट्टिकां पूरयत ।

| | पदम् | समानार्थपदम् |
|---|---|---|
| उदा- | केदारः | क्षेत्रम् |
| | कमलम् | |
| | हनुमान् | |
| | राजा | |
| | सज्जनाः | |

| |
|---|
| क्षेत्रम् |
| नृपः |
| मारुतिः |
| पद्मम् |
| साधवः |

14. काव्यभागं पठित्वा सूचनाः उपयुज्य टिप्पणीं लिखत।

माकन्दं समाहर्तुं नोत्सुको भूत्वा मातु-
रर्भकः पुंस्कोकिलोऽप्यगच्छत् सुरलोकम्॥

सूचनाः - वैलोप्पिल्लि श्रीधरमेनोन् - माम्पूम् - माकन्दमञ्जरी - पुत्रेण चूतभञ्जनम्
- मातुः भर्त्सनं - पुत्रस्य प्रतिकरणम् - पुत्रस्य वियोगः - कविभावना ।

15-18 अधोदत्तेभ्यः प्रश्नेभ्यः द्वयोः उत्तरे लिखत । 2x4=8

15. 'प्रलोभनानुत्तर' इति पाठभागानुसारं सम्भाषणांशान् पूरयत।

रवीन्द्रः - मित्र! वयं छात्राः विवेकपूर्वं जीवेम । प्रलोभने मा पताम।

नरेन्द्रः - सत्यम्। .............. अधिकृत्य पठितं पाठभागं नाटकरूपेण अवतारयामः ।

रवीन्द्रः - समीचीनः आशयः । कं .............. नाटकावतारणाय स्वीकुर्मः?

नरेन्द्रः - तदर्थं पटकथा विरचनीया खलु ?

रवीन्द्रः - 'प्रलोभनानुत्तर' इति पाठभागमधिकृत्य .......... विरचनीया । साहाय्यार्थम् अध्यापकं प्रार्थयावः ।

नरेन्द्रः - कथामिमां कः व्यरचयत् ?

रवीन्द्रः - नारायणपण्डितः ।

नरेन्द्रः - .................... हितोपदेशस्य कर्ता किल ?

रवीन्द्रः - आम् । अध्यापकम् उपगम्य पटकथानिर्माणाय साहाय्यं प्रार्थयावः ।

नरेन्द्रः - अस्तु गच्छावः ।

16. सूचनाः उपयुज्य जीवनचरितं लिखत।

सूचनाः - नाम - सुब्रह्मण्यः।

जन्म - 1859 पालक्काट् कुफल्मन्दम्।

पितरौ - अच्युतन् नायर्, कुञ्ञम्मा।

प्रशस्तिः - तपोवनस्वामी।

गुरवः - चट्टम्पिस्वामी, शिवानन्दयोगी, शान्त्यानन्दसरस्वती।

कृतयः - हिमगिरिविहारम्, कैलासयात्रा (यात्राविवरणम्)।

समाधिः - 1957 जनुवरि 16

17. सूचनाः उपयुज्य कूटियाट्टम् अधिकृत्य लघुटिप्पणीं लिखत।

सूचनाः - संस्कृतदृश्यकलारूपम् - केरलीयसंस्कृतरूपकम् - चतुर्विधाभिनयाः - क्रिस्तुवर्षे दशमशतके- कूत्तम्पलेषु - विश्वपैतृककला - अभिनयक्रमः- वाद्योपकरणानि।

18. यथोचितं पट्टिकां पूरयत।

| | कृतिः | कर्ता | विभागः |
|---|---|---|---|
| उदा- | रामायणम् | वाल्मीकिः | इतिहासः |
| | ............ | व्यासः | इतिहासः । |
| | हितोपदेशः | नारायणपण्डितः | ............ । |
| | ............... | अतुलः | चरित्रकाव्यम् । |
| | बालिद्वीप् | ...................... | सञ्चारसाहित्यम् । |

19. प्रादेशिकभाषया विवर्तयत। 1x5=5

भारतीयसंस्कृतेः आधारभूता भवति संस्कृतभाषा। अस्याः भाषायाः ज्ञानविज्ञानसम्पत् अतिविस्तृता एव। तस्याः साहित्यशाखा अपि अतिविपुला लोकप्रसिद्धा च। अभिज्ञानशाकुन्तल-मृच्छकटिकादीनि नाटकानि अस्यां भाषायामेव रचितानि। संस्कृतसाहित्ये काव्यानि अत्यन्तम् आह्लाददायकानि भवन्ति।